# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

## अध्याय ४५

ततो रजन्यां व्युष्टायां लक्ष्मणो दीनचेतनः ।
सुमन्त्रमब्रवीद्वाक्यं मुखेन परिशुष्यता ॥ १ ॥

सारथे तुरगाञ्शीघ्रं योजयस्व रथोत्तमे ।
स्वास्तीर्णं राजभवनात्सीतायाश्चासनं शुभम् ॥ २ ॥

सीता हि राजभवनादाश्रमं पुण्यकर्मणाम् ।
मया नेता महर्षीणां शीघ्रमानीयतां रथः ॥ ३ ॥

सुमन्त्रस्तु तथेत्युक्त्वा युक्तं परमवाजिभिः ।
रथं सुरुचिरप्रख्यं स्वास्तीर्णं सुखशय्यया ॥ ४ ॥

आदायोवाच सौमित्रिं मित्राणां हर्षवर्धनम् ।
रथोऽयं समनुप्राप्तो यत्कार्यं क्रियतां प्रभो ॥ ५ ॥

एवमुक्तः सुमन्त्रेण राजवेश्म स लक्ष्मणः ।
प्रविश्य सीतामासाद्य व्याजहार नरर्षभः ॥ ६ ॥

गङ्गातीरे मया देवि मुनीनामाश्रमे शुभे ।
शीघ्रं गत्वोपनेयासि शासनात्पार्थिवस्य नः ॥ ७ ॥

एवमुक्ता तु वैदेही लक्ष्मणेन महात्मना ।
प्रहर्षमतुलं लेभे गमनं चाभ्यरोचयत् ॥ ८ ॥

वासांसि च महार्हाणि रत्नानि विविधानि च ।
गृहीत्वा तानि वैदेही गमनायोपचक्रमे ॥ ९ ॥

इमानि मुनिपत्नीनां दास्याम्याभरणान्यहम् ।
सौमित्रिस्तु तथेत्युक्त्वा रथमारोप्य मैथिलीम् ।
प्रययौ शीघ्रतुरगो रामस्याज्ञाम् अनुस्मरन् ॥ १० ॥

अब्रवीच्च तदा सीता लक्ष्मणं लक्ष्मिवर्धनम् ।
अशुभानि बहून्यद्य पश्यामि रघुनन्दन ॥ ११ ॥

नयनं मे स्फुरत्यद्य गात्रोत्कम्पश्च जायते ।
हृदयं चैव सौमित्रे अस्वस्थमिव लक्षये ॥ १२ ॥

औत्सुक्यं परमं चापि अधृतिश्च परा मम ।
शून्यामिव च पश्यामि पृथिवीं पृथुलोचन ॥ १३ ॥

अपि स्वस्ति भवेत्तस्य भ्रातुस्ते भ्रातृभिः सह ।
श्वश्रूणां चैव मे वीर सर्वासामविशेषतः ॥ १४ ॥

पुरे जनपदे चैव कुशलं प्राणिनाम् अपि ।
इत्यञ्जलिकृता सीता देवता अभ्ययाचत ॥ १५ ॥

लक्ष्मणोऽर्थं तु तं श्रुत्वा शिरसा वन्द्य मैथिलीम् ।
शिवमित्यब्रवीद्धृष्टो हृदयेन विशुष्यता ॥ १६ ॥

ततो वासमुपागम्य गोमतीतीर आश्रमे ।
प्रभाते पुनरुत्थाय सौमित्रिः सूतमब्रवीत् ॥ १७ ॥

योजयस्व रथं शीघ्रमद्य भागीरथी जलम् ।
शिरसा धारयिष्यामि त्र्यम्बकः पर्वते यथा ॥ १८ ॥

सोऽश्वान्विचारयित्वाशु रथे युक्त्वा मनोजवान् ।
आरोहस्वेति वैदेहीं सूतः प्राञ्जलिरब्रवीत् ॥ १९ ॥

सा तु सूतस्य वचनादारुरोह रथोत्तमम् ।
सीता सौमित्रिणा सार्धं सुमित्रेण च धीमता ॥ २० ॥

अथार्धदिवसं गत्वा भागीरथ्या जलाशयम् ।
निरीक्ष्य लक्ष्मणो दीनः प्ररुरोद महास्वनम् ॥ २१ ॥

सीता तु परमायत्ता दृष्ट्वा लक्ष्मणमातुरम् ।
उवाच वाक्यं धर्मज्ञ किमिदं रुद्यते त्वया ॥ २२ ॥

जाह्नवी तीरमासाद्य चिराभिलषितं मम ।
हर्षकाले किमर्थं मां विषादयसि लक्ष्मण ॥ २३ ॥

नित्यं त्वं रामपादेषु वर्तसे पुरुषर्षभ ।
कच्चिद्विना कृतस्तेन द्विरात्रे शोकमागतः ॥ २४ ॥

ममापि दयितो रामो जीवितेनापि लक्ष्मण ।
न चाहमेवं शोचामि मैवं त्वं बालिशो भव ॥ २५ ॥

तारयस्व च मां गङ्गां दर्शयस्व च तापसान् ।

ततो धनानि वासांसि दास्याम्याभरणानि च ॥ २६॥

ततः कृत्वा महर्षीणां यथार्हमभिवादनम् ।
तत्र चैकां निशामुष्य यास्यामस्तां पुरीं पुनः ॥ २७॥

तस्यास्तद्वचनं श्रुत्वा प्रमृज्य नयने शुभे ।
तितीर्षुर्लक्ष्मणो गङ्गां शुभां नावमुपाहरत् ॥ २८॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com